International Journal of Sanskrit Research 2022; 8(3): 120-127

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 120-127
© 2022 IJSR
www.anantaajournal.com
Received: 15-01-2022
Accepted: 19-02-2022

**Kripa Ram Sharma**
Ph.D. Student, Department of Sahitya, Central Sanskrit University Shri Raghunath kirti Campus, Devprayag, Uttarakhand, India

**Corresponding Author:**
**Kripa Ram Sharma**
Ph.D. Student, Department of Sahitya, Central Sanskrit University Shri Raghunath kirti Campus, Devprayag, Uttarakhand, India

# संस्कृतसाहित्ये गद्यकाव्यस्य उत्पत्तिविकासश्च

**Kripa Ram Sharma**

## प्रस्तावना

काव्यस्य भेदद्वयं स्वीकुर्वता विश्वनाथेन निगद्यते-"दृश्यश्रव्यभेदेन पुनः काव्यं द्विधा मतम्"। (सा.द.6.1)

तत्र च दृश्यकाव्यं नाटकादिकं श्रव्यकाव्यञ्च पद्य-गद्य भेदेन द्विधा विभज्यते। 'श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा'। (सा.द.6.313)

गद्यकाव्यलक्षणं तेनोच्यते- यथा- "वृत्तबन्धोज्झितं गद्यम्"।। (सा.द.6.330)

अग्निपुराणे गद्यलक्षणं निर्दिश्यते-'अपादः पदसन्तानो गद्यं तदपि कथ्यते।' काव्यादर्शे दण्डी काव्यं त्रेधा विभज्यते-"गद्यं पद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्"।(काव्यादर्श-1.11) गद्यलक्षणं च तेनाभिधीयते- 'अपादः पदसन्तानो गद्यम्' (काव्यादर्श.1.23)। पादविभाजनरहितः पदसमुच्चयो गद्यमिति।

गद्यकाव्येऽपि काव्यलक्षणं सर्वथा प्रस्फुरतीति गद्यबन्धोऽपि काव्यमुच्यते। 'शब्दार्थौ सहितौ काव्यम्' (भामह.1.16), 'तददोषौ शब्दार्थौ- सगुणावनलंकृती पुनः

क्वापि' (काव्यप्रकाश 1.4), 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'(रसगंगाधर), 'वाक्यं रसात्मकं काव्यम्' (सा.द.1.3) ।

इत्यादिषु तक्षणेषु रसात्मकं, सगुणत्वम् रमणीयार्थप्रतिपादकत्वं च काव्येऽपेश्यन्ते। एते गुणा यथैव पद्यात्मके काव्ये प्राप्यन्ते तथैव काव्येषु गद्यकाव्येऽपि। रसा भावा गुणा अलङ्कारादयो यथा पद्यकाव्ये उपलभ्यन्ते, तथैव गद्यकाव्येऽपि। अत एव गद्यबन्धोऽपि काव्यमुच्यते।

## गद्यकाव्यस्योत्पत्तिः-

गद्यकाव्यस्योत्पत्तिविषयं मतत्रयं प्रस्तूयते।

1. गद्यकाव्यस्योत्पत्तिः पद्यकाव्येभ्यो लोककथामाध्यमेन समभवत्।
2. ग्रीकगद्यरचनाभ्यो भारतीयगद्यकाव्योद्भवः।
3. पद्यकाव्यसमानान्तरमेव स्वाभाविकक्रमिकविकासेन गद्यकाव्यउत्पत्तिः।

प्रथममतस्याभिमतमिदं यत् संस्कृतगद्यकाव्यानि मूलतः संस्कृतपद्यकाव्योद्भूतानि। पद्यकाव्यशैलीम् अनुसृत्यैव कृत्रिमता, पाण्डित्यप्रदर्शनम्, रसालंकारादिप्रयोगश्च तत्रोपलभ्यते। द्वितीयं मतं डा.पीटर्सनप्रभृतिभिः प्रस्तूयते यद् भारतीयगद्यकाव्यानि ग्रीकगद्यकाव्यानुसरणमूलानि। प्रो.सिल्वां लेवी sylvan levi मतमेतत् खण्डयति यद् ग्रीकगद्यकाव्यानि कथासंयोजने बलाधानम्, भारतीयगद्य काव्येषु तु रसालंकाराणां शैल्यः प्रकृतिवर्णनादीनां च प्राधान्यं लक्ष्यते। एवं द्वयोर्मौलिकभेदेन सर्वथा वैषम्यमिति विज्ञायते। प्रो. लाकोटे महोदय तु ग्रीकगद्यकाव्ये भारतीयगद्यकाव्यस्य प्रभावं साधयती। अतः सिध्यति यत् संस्कृतगद्यकाव्यस्य ग्रीकगद्यकाव्याद् उद्भवस्य मतं निःसारमेव।
सूक्ष्मदृष्ट्या विविज्यते चेत् तृतीयं मतं समीचीनतमं प्रतीयते। पद्यकाव्यधारासमानान्तरमेव गद्यकाव्य धारापि दृग्गोचरतामुपयाति। न केवलं लौकिककाव्येऽपि तु वैदिकवाङमयेऽपि ऋग्वैदिक-कालिकपद्यसमकालमेव यजुर्वेदीयं गद्यं अथर्ववेदीयञ्च गद्यमुपलभ्यते। अत एव पतञ्यले महाभाष्ये साहित्यिकगद्यग्रन्थानाप्युल्लेख उपलभ्यते। तत्र आख्यायिका-ग्रन्थत्रयं तेनोल्लिख्यते।

1. वासवदत्ता
2. सुमनोत्तरा
3. भैमरथी।

**साहित्यदर्पणे गद्यं चतुर्धा विभज्यते**

1. मुक्तकम्
2. वृत्तबन्धो
3. उत्कलिकाप्रायम्
4. चूर्णकम्

"वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्।।"
"आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्।।"

परं दण्डिनः काव्यादर्शे, रुद्रटस्य काव्यालंकारे अमरकोशे च भेदद्वयम् एतत् कथा-आख्यायिका इति विविच्यते। तदनुसारं कथा – कविकल्पिता, कथाया वक्ता नायकः स्वयम् अन्यो वा कश्चन, उच्छवासादिविभाजनाभावः, वक्त्रापवक्त्रादिपद्याभावः, भाषा संस्कृतं प्राकृतादिकं वा, स्वचरितवर्णनाद्यभावः।

**आख्यायिका-** ऐतिहासिक-कथा-सम्बद्धा, नायकोऽत्र वक्ता उच्छवादिषु विभक्ता,वक्त्रापरवक्त्रपद्यसंयुक्ता, संस्कृतनिष्ठा, स्वल्पपद्यान्विता, स्वचरित-परकविचरित्तदिसंयुक्ता च।
तत्र 'कादम्बरी' कथाया निदर्शनं 'हर्षचरितम्' च आख्यायिकायाः।

**अग्निपुराणे गद्यकाव्यं पञ्चधा विभज्यते**

1. कथा
2. खण्डकथा
3. परिकथा
4. आख्यायिका
5. कथानिका। परं भेदद्वयमेव अवास्तविकमिति विराक्रियते दण्डिप्रभृतिभिः।

आचार्यदण्डिनः पूर्ववर्तिनः केचन गद्यग्रन्थाः प्राप्यन्ते। तत्रेभे प्राधान्येनोल्लेखमर्हन्ति- गुणाढ्यकृता बृहत्कथा, श्रीपालितकृता तरगंवती, घनपालकृता तिलकमञ्जरी, रूद्रदाम्नो गिरिनारशिलालेखः, प्रयागस्तम्भे हरिषेणकृता समुद्रगुप्तप्रशस्तिश्चेति गद्यकाव्यपरम्परां गद्यकाव्यस्य नैरन्तर्यम् अविच्छिन्नंत्व च प्रतिपादयति।

**गद्यकाव्यस्य विकासः**

गद्यकाव्यस्य विकासे सर्वप्रथमं वैदिकगद्यं दृग्गोचरी भवती। 'शेषे यजुः शब्दः' (पूर्वमीमांसा 2.1.37) इत्यत्र पद्यगीतिभिन्नं गद्यं यजुरिति कथ्यते। वैदिकगद्यस्य प्राचीनतमं रूपं शुक्लयजुर्वेदे, कृष्णयजुर्वेदस्य तैत्तिरीय-काठक-मैत्रायणी-संहितासु प्राप्यते। अथर्ववेदेऽपि प्रचुरो गद्यांशोऽवलोक्यते। सर्वेऽपि ब्राह्मण ग्रन्थाः प्रायशो गद्यात्मका एव। तत्रापि ऐतरेय-तैत्तिरीय-शतपथब्राह्मणेषु गद्यांशस्य बाहुल्यं परिलक्षते।

वेदाङ्गसम्बद्धाः प्रातिशाख्यग्रन्थाः, श्रौत-गृह्य-धर्म-शुल्वेति-चतुर्विधाः कल्पग्रन्थाः निरूक्तं च गद्यात्मकसूत्रपद्धत्या निबद्धाः सन्ति। पुराणानि यद्यपि पद्यांशबहुलानि, तथापि महाभारते, विष्णुपुराणे भागवतपुराणे च प्रचुरो गद्यांश आसाद्यते। भागवतादिषु ललितपदबन्धनम् अलंकारादिसमन्वितं प्रौढम् अनवधं च गद्यं प्रेश्यते।

वैदिकसूत्रग्रन्थपरम्परायामेव शास्त्रीयग्रंथेषु शास्त्रीयगद्यमपि विकसितम्। भारतीयं षड्दर्शनं सूत्रात्मक-गद्य-शैल्यामेव विकासमलभत। पाणिनिकृता अष्टाध्यायी सूत्रात्मकगद्यशैल्या आदर्शीभूता। शास्त्रीयभाष्यपरंपरायां यास्कप्रणीतं निरूक्तम्, जयन्तभट्टकृता न्यायमञ्जरी, शबरस्वामिकृतं मीमांसाभाष्यम्, शङ्कराचार्यकृतं ब्रह्मसूत्र-शारीरकभाष्यं च प्रथिततमा गद्यग्रन्थाः।

पतञ्जलेव्याकरण-भाष्यं प्रसादगुणान्वित शैल्याः समाश्रयेण लोकप्रियतायां चरमोत्कर्षं धत्ते। कौटिलीयम् मीमांसाभाष्यम् शङ्कराचार्यस्य, अर्थशास्त्रमपि शास्त्रीय गद्यनिदर्शनत्वेनाश्रयणीयम्। एवं वैदिकग्रन्थानन्तरं लौकिकग्रन्थेषु अपि गद्यस्य महति महनीयता प्रतिपाद्यते।

ततश्च गद्यकाव्यस्य स्वर्णयुगः प्रारभते। सर्वप्रथमं दण्डिनो दशकुमारचरितम्, सुबन्धोर्वासवदत्ता, बाणस्य हर्षचरितं कादम्बरी चेति गद्यकाव्यस्य रत्नानि समुपलभ्यन्ते। दण्डि-सुबन्धु-बाणभट्टा गद्यकवीनां बृहत्त्रयीरूपेणाभिनन्द्यन्ते।

संस्कृतगद्यकाव्यस्य परिष्कृतं प्राञ्जलं विशदं च रूपं दण्डिनो दशकुमारचरिताद् दृष्टिपथम् उपयाति। दण्डिनो गद्यं सरस्वत्या विलासमणिदर्पणरुपेण मधुराविजयमहाकाव्य- रचयित्र्य गगांदेव्या स्तूयते-

**आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम्।**
**विकासो वेधसः पत्न्या विलासमणिदर्पणम्।।**
**(गङ्गदेवी)**

महाकवेर्दण्डिनो जीवनकालविषये समासतः पक्षद्वयं मुख्यत्वेनाङ्गीक्रियते। केचन ईसवीयाब्दस्य षष्ठशताब्द्या अन्तिमे चरणेऽस्य जनिमुररीकुर्वन्ति, अन्ये च सप्तमशताब्द्या उत्तरार्धे। राजशेखरेण कविरसौ प्रबरन्धत्रयस्य प्रणेतेति प्रतिपाद्यते। विषयंSस्मिन्नपि प्रचुरो विवादः। काव्यादर्शो दशकुमारचरितं चेति ग्रन्थद्वयं तु सर्वैरेव स्वीक्रियते दण्डिनः कृतित्वेन। अवन्तिसुन्दरीकथा इति खण्डश उपलब्धा कृतिस्तृतीयेति मन्यते मनीषिभिः कैश्चित्।

"निर्दण्डोऽपि यो दण्डी यतिर्दशकुमारकृत्।
काव्यादर्शो निरादर्शः सुन्दरीं श्रयते मनिः।।"

**कपिलमुनिनापि उक्तम्**

"सकषायोऽपि यो दण्डी नाम्ना दण्डी न चेतसा।
विरक्तो योऽविरक्तोऽपि यतिसंज्ञो यतिच्युतः।।"

**दण्डिनः संस्कृतसाहित्ये स्थानम्**

दशकुमारचरितमाश्रित्यैव अस्य महती महनीयतेति नात्र विप्रतिपत्तिर्विदुषाम्। गद्यकाव्यस्यैतस्य गौरवं पदलालित्यं च प्रेक्षं प्रेक्षं प्रेक्षावतां प्राप्यन्ते प्रभूतानि प्रचुरप्रशस्तिपूर्णानि पद्यानि। यथा-

"जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि।।"

दशकुमारचरिते दण्डिनोल्लिखिता सूक्तयः अनुपदमेव मनो हरति। तत्र दण्डिनः पदलालित्यं स्फुटमेव प्रतिस्फुरति।

**दण्डिनः पदलालित्यम्**

यत्र पदेषु वाक्येषु शब्दसंघटनायां माधुर्यं श्रुतिसुखदत्त्वं वा समुपलभ्यते, तत्र

पदलालित्यमित्यमिति मन्यते। पदलालित्यं शब्दसौष्ठवं चावर्ययति सचेतसां चेतांसीति गुणोऽयं गरिमाणं तनुते काव्यस्य। दशकुमारचरितेऽपि दृश्यते गुणस्यैतस्य गौरवम्। तच्चेह समासतो व्याचिख्यासितम्।

मृद्वीकारसभारभरितेव भारती दण्डिन आचार्यस्य। सुधीभिरास्वादनीयं समीक्षणीयं चैतस्या माधुर्यम्। राजहंसस्येव राज्ञो राजहंसस्य सुषमां समवलोकयन्तु सन्तः।

> "अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भार भासुरभूसुरनिकरः,...राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरुपो भूपो बभूव" (पूर्वपीठिका उच्छावास.1)

मालवेश्वरस्य प्रस्थानवर्णनं कुर्वताऽभिधीयते तेन–
"मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम" (पू.पी. उ. 1)

राजहंसश्च मालवराजचमूं स्वसैन्यसहितोऽवारुणत्।

> "राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध" (पू.पी,उ.1)।

विजयार्थं प्रस्थातुकामानां कुमाराणां यमकालंकारालंकृतं वर्णनमदो दण्डिनो वाग्वैभवमेवाविर्भावयति।

"कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः" (पू.पी.उ.2)

ऐन्द्रजालिककृतेन्द्रजालप्रदर्शनरूपेण फणनां वर्णनं एतत्-

> "तदनु विषयं विषमुल्बणं वमन्तः फणालंकरणा रत्नराजितराजमन्दिराभोगा भोगिनो भयं जनयन्तो निश्चेरूः" (पू.पी-उ.5)

दण्डिनो भावभाषामाधुर्यं रचनाकौशलं मनोभावाभिव्यञ्जनदक्षत्वं रसप्रवणत्वं सालंकृतत्वं च निरीक्ष्य विपश्चितल्लजैः दण्डी एव विपदमर्हतीति 'कविर्दण्डी' इति सादरम् उदघोष्यते।

राजशेखरेण शार्ङ्गधरपद्धतौ पद्यमिदं प्रस्तूयते यत्-

> "त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः"।
> त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।।

अत्र 'त्रयो दण्डिप्रबन्धाश्च' इत्याश्रित्य सुधीभिः दण्डिनो ग्रन्थत्रयस्यान्वेषणम् आरब्धम्। यथा- दशकुमारचरितम्, काव्यादर्शः, अवन्तिसुन्दरीकथा। दशकुमारचरितस्य विशेषतानां सूक्तीनाञ्च वर्णनं पूर्वं प्रस्तुतमेव। द्वितीयस्तु वर्तते काव्यादर्शः। आचार्यदण्डिना काव्यादर्शे 'ओजः समासभूयस्त्वम् एतद् गद्यस्य जीवितम्' (का.1.80) इत्युदीर्यते।

स गद्ये ओजोगुणप्राधान्यं समासबाहुल्यं च तज्जीवितरूपेण अङ्गीकरोति। तस्याभिप्रायोऽयं यद्गे ओजोगुणेनैव स्पूर्तिः शक्तिमत्ता हृद्यत्वं चापद्यते। तत्र समासभूयस्त्वेन चमत्कृतिः कान्तिमत्त्वम् औदार्यं च। यदि गद्य दृढबन्धः, समासबाहुल्यम्, ओजः प्राधान्यम्, विविधालंकृति-पुष्टत्वं च न स्यात् तर्हि गद्यकाव्यं जीर्णभवनमिव विशीर्येत। ओजोगुणः तस्य सौन्दर्यं पुष्णाति, समासभूयस्त्वं च दृढस्तम्भवत् काव्यप्रासादसंरक्षकं बलाधायकं च। समासरहितं गद्यकाव्यं निर्बलं सद् बलीयसा आलोचनामारुतेन प्रपीडितं ध्वंसेत। सुमधुरगद्यबन्धे दण्डी राज्ञो धर्मवर्धनस्य दुहितरमुपवर्णयति।

"तस्य दुहिता प्रत्यादेश इव श्रियः, प्राणा इव कुसुमधन्वनः, सौकुमार्य-विडम्बितनवमालिका, नवमालिका नाम कन्यका" (उ.पी.5)।

एवं संलक्ष्यते दण्डिनः कृतौ शब्दयोजनसौष्ठवमनुप्रासमाधुर्यं यमकयोजनं वर्णनवैशद्यम्। ओष्ठ्यवर्णपरिहाराञ्चितं रम्यं वर्णनम्, उक्तिप्रत्युक्तिप्रशस्तं पदे-पदे प्रचुरं पदलालित्यम्। यथा- गिरिवरं वर्ण्यन्नाह-

> "अहो रमणीयोऽयं पर्वतनितम्बभागः, कान्ततरेयं गन्धपाषाणवत्युपत्यका,
> शिशिरमिदमिन्दीवरारविन्दमकरन्दबिन्दु-

चन्द्रकोत्तरं गोत्रवारि, रम्योऽयमनेकवर्णकुसुममञ्जरीभरस्तरूवनाभोगः।"

सुमधुरगद्यबन्धे दण्डी सुबन्धुबाणभट्टश्चेति गद्यकवित्रयी प्रथिततया। समुद्रगुप्तस्य हरिषेण-कृतायां प्रयागप्रशस्तौ रूद्रदाम्नो गिरिनारप्रशस्तौ च ओजः समासभूयस्त्व विशिष्टस्य गद्यस्य माधुर्यं संलक्ष्यते। एवं सिध्यति यद् अस्यलितपदरचया अलंकारादिमाधुर्येण समासादिवैशिष्ट्येन च गद्यकाव्यं प्रथते।
अस्मिन्नेवाङ्के यौगन्धरायणेन उक्तम्-

"प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते" (वासव.1.7)

अस्याशयो वर्तते यत्- अप्रीतिः सम्मानश्च चित्तवृत्त्यानुसारेणेव उत्पद्यते।
मानवस्य आन्तरिकेवोद्वेगो इति। सुबन्धुना एकस्मिन् स्थाने व्यासस्य गरिमां वर्णयन्नाह-

"सुखमर्थो भवेददातुं, सुखं प्राणाः, सुखं तपः।
सुखमन्यद्भवेत्सर्वं, दःखं न्यासस्य रक्षणम्।।"

अर्थात् धनम्, प्राणाः, तपः फलं सर्वं सौकार्येण दीयते परं धरोहरस्य रक्षणं दुःखदायकं भवति।
षष्ठोऽङ्के सुबन्धना सूक्तिरियमुक्तम्-
"दुःखं व्यक्तं बद्धमूलोऽनुरागः स्मृत्वा स्मृत्वा याति दःखं नवतम् यात्रा त्वेषा यद् विमुच्येह वाष्पं प्राप्ताऽनृण्या याति बुद्धिः प्रसादम्।
अश्रुपातेन निर्यातिताऽनुरागऋणमिव चित्तं किञ्चित् उच्छ्वसितं भवतीति भावः।
तत्रैव अङ्कान्ते गुणानामागाराः सुदुर्लभाः इति कथयन्नाह-

"गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः।।"

गुणानामादराणां च कर्तारो भुवि सुलभाः, परं तादृशानां गुणानां सत्काराणां च ज्ञातारो दुष्प्रात्या इति।

"प्रायेण हि नरेन्द्रश्रीः सोत्साहैरैव भुज्यते।"
"कः कं शक्तो रक्षितुं मृत्युकाले? रज्जुच्छेदे के घटं धारयन्ति एवं लोरस्तुल्यधर्मो वनाने काले काले छिद्यते ऊह्यते च।"

एवं सुबन्धोः काव्ये पदे-पदे वाग्वैचित्र्यमर्थगाम्भीर्यं भाववैभवं कल्पनाकाभ्यत्वं च दृष्टिपथमुपयाति।
सुबन्धुकृत- वासवदत्तायाम् अलंकृता श्लेषबहुला शैली दृग्गोचरतामायाति। 'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' इति सर्वात्मरूपेण सुबन्धौप उपलभ्यते। कविः स्वकाव्यप्रशंसायामुल्लिखति–

"प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निब न्धम्" (वासव.भू.13)

**सुबन्धोः काव्यप्रशस्तिः**

संस्कृतगद्यकाव्येषु दण्डेः अनन्तरं सुबन्धोः नाम। 'राघवपाण्डवेय' काव्यस्य कर्त्ता द्वादश शदाब्द्यां सर्वप्रथमं सुबन्धोः नामोल्लेखं करोति। यथा-

"सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः।
वक्रोक्तिमार्गनिपुणाश्चतुर्थो विद्यते न वा।।"
सुबन्धोः कालविषये अनेके मतभेदाः।

निष्कर्षाधारेण सुबन्धुः कविवर बाणभट्टस्य विद्यते। बाणभट्टेन हर्षचरिते उक्तम्-

"कवीनामगलददर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्।।"

**सूक्तीनां विमर्शः**

कविवरेण वासवदत्तायाः प्रथमोऽङ्के भाग्यविषये चक्रस्योदाहरणं दत्त्वा अति शोभितरूपेण वचनमिदमुक्तम्-

"कालक्रमेण जगतः परिवर्तमाना-
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः।।"
यथा चक्रं कदाचिदुपरि अधो वा गच्छति तथैव भाग्यमिति।

**बाणोच्छिष्टं जगत्सर्वम्- बाणस्य**

बाणस्य वस्तुविवृतौ वर्णने चापूर्वं वैशारद्यं वीक्ष्य मन्त्रमुग्धत्वमनुभवन्ति मनीषिणः। वणर्यस्य वस्ततुनोऽणुताममपि विवृतिं न वजहाति, न किञ्चिदुज्झति परस्मै यत्तेन शक्यं वर्णयितुम्। वर्णनानां व्यापित्वात्, सर्वाङ्गीणत्वात्, सूक्ष्मविवरणसमन्वितत्वाच्च 'बाणोच्छिष्टं जगत्सर्वम्' इति भूयो भूयो व्यादिश्यते।

श्रीगोवर्धनाचार्यस्य सूक्तिरियं सुधियां मोदमावहति यद् वाग्देवी सरस्वत्येव प्रागल्भ्यमधिकम् अवाप्तं बाणरूपेण जनिं लेभे। उक्तं च–

"जाता शिखण्डिनी प्रग् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमवाप्तुं वाणी बाणो बभूव ह।।"

बाणस्यक कृतिद्वयं समीक्ष्यते चेत् तर्हि वाग्देव्या अवतारस्येव अवतारस्येव बाणस्य कलाकौशलं भाषामाधुर्यं रसप्रवाहश्चप्राप्यते। बाणस्य वर्णनेषु भाव-भाषयोः सामञ्जस्यम्, भाषायां आरोहावरोहौ, दीर्घतरसमस्तपदावली प्रयोगसमन्तरामेव लप्पुपदावलीप्रयोगो विशेषतोऽवलोक्यते।

हर्षचरिते कवेऽर्वर्णन-चातुरी बहुशोऽवलोक्यते। तेषु मुख्यतः उल्लेख्याः प्रसङगाः सन्ति- मुमूर्षोर्नृपस्य प्रभाकरवर्धनस्य वर्णनम्, वैधव्य-दुःखपरिहाराय सतीत्वमाश्रयन्त्या यशोवत्या वर्णनम्, सिंहनादस्योपदेशः, दिवाकरमित्रस्य राज्यश्रीसान्त्वनम्। परं कवेर्गरिमा कमनीयां कादम्बरीमेव आश्रित्यावतिष्ठते। इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम्।

कादम्बर्यां यत्र तत्र साङोपाङ् वर्णनं महता श्रमेण बाणेन उपस्थाप्यते, तेऽत्र प्रसगां नामग्राह दिङमात्रं प्रस्तूयन्ते। यथा- शूद्रकवर्णनम्, चाण्डालकन्यावर्णनम्, विन्ध्याटवीवर्णनम्, पम्पासरोवरवर्णनम्, प्रभातवर्णनम्, हारिवतर्णनम्, महाश्वेता कादम्बरी वर्णनञ्च।

निखिलेऽपि संस्कृतवाङ्मये कविकुलगुरूः कालिदासो यथा रचनाचातुर्येण कल्पनावैचित्र्येण च पद्यबन्धे गरिष्ठो वरिष्ठश्च, तथैव गद्यकाव्यनिबन्धने कववरो बाणोऽतिशेतेऽन्यात् सर्वानप्यभिरूपान्। पद्यरचनायां केषुचिदेव पद्येषु उक्ति-वैचित्र्येण भावगाम्भीर्येण कृतिकौशलेन वाऽपूर्वा छटा संजायतेऽखिलेऽपि काव्ये। परं नैतावतै सम्भाव्यते गद्यताव्ये अपि तादृश्यनुपमा कान्तिः। गद्यकाव्ये तु भूयान् श्रमो अपेक्ष्यते। पदे-पदे वाग्वैचित्र्यमर्थगाम्भीर्यं भाववैभवं कल्पनाकाम्यत्वं च दुर्निवारम् अतः साधूच्यते-

"गद्यं कवीनां निकषं वदन्ति"।

गद्यकाव्यबन्धे दण्डी सुबन्धुश्चेति द्वावेतौ बाणेन समं सनामग्राहमुल्लेख्यौ। परं बाणो गरिष्ठो वरिष्ठश्च त्रयाणां भूयिष्ठया भावाभिव्यक्त्या, साधिष्ठया शैल्या म्रदिष्ठया मनोहरतया, श्रेष्ठया साधुतया, प्रेष्ठया पदपरिष्कृत्या च।

अतः सोड्ढलेन "बाणः कवीनामिह चक्रवर्ती" इत्युक्तम् धर्मदासेन तरूणीलावण्यमस्य कृतौ दृश्यते। यथा-

"रूचिर-स्वरवर्ण- यदा रसभाववती जगन्मनो हरति।
सा किं तरूणी? नहि नहि वाणी बाणस्य मधुरशीलस्य।।"

गङगादेव्या सरस्वतीवीणाध्वनिवेव कृतिष्वस्य निशम्यते।

"वीणापाणिपरामृष्टवीणानिक्कवाणहारिणीम्।
भावयन्ति कथं वाऽन्ये भट्टबाणस्य भारतीम्।।

जयदेवो बाणं पञ्चबाणेन कामेनोपनिमीते-

"हृदयवसतिः पञ्चबाणस्तु बाणः।
श्रीचन्द्रदेवोऽमुं कविकुम्भिकुञ्जरगण्ड भेदकं सिंह गणयति-
आ सर्वत्रगभीरधीरकविताविन्ध्यातवी चातुरीसंचारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः।।"

एतदद्भुतत्वमेव कादम्बर्या रोचकत्वं वर्धयति। केचन हृद्याः प्रसङ्ग अत्रोपस्थाप्यन्ते। वसन्तर्तुवर्णने कोमलकान्तपदावल्याः समन्वयो लक्ष्यः।

"कोमलमलयमारूतावतारतरङ्गितानङ्ध्वजांशुकेषु..... मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु ....मधुमासदिवसेषु.(कादम्बरी)"

सन्ध्यावर्णने उत्प्रेक्षाणां माधुर्यं यथा
"क्वापि विहत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला परिनर्तमाना सन्ध्या मुनिभिरदृश्यत। अपराम्भसि पतिते दिनकरे...अम्भः सीकरनिकरमिव तारागणम् अम्बरम् अधारयत्स (कादम्बरी)।"
शुकनासोपदेशे कवेः प्रतिभायाश्चरमोत्कर्षो लक्ष्यते तत्र कवेर्लेखनी भावोद्रेके प्रवहमानेव प्रतीयते। शुरनसोपदेशे साक्षात्प्रतीयते यत्- "वाणी बाणो बभूव ह"।
शकनासोपदेशे विरोधाभासमूलकं लक्ष्मीस्वभाव वर्णनम्। यथा-

"उन्नतिमादधानापि नीचस्वभावताम् आविष्करोति। अमृतसतोदरापि कटुकविपाका। विग्रहवत्यपि अप्रत्क्षदर्शना। पुरूषोत्तसरताऽपि खलजनप्रिया।" (कादम्बरी)
शुकनासोपदेशे प्रसादगुणोपेता पदावली। यथा-
"न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति।" (कादम्बरी)
एवं सिध्यति यत् क्वचित् ओजोगुणः, क्वचित् रसानुकुलं वर्णनम्, क्वचिदर्थगौरवं च परिलक्ष्यते। बाणस्य वर्णनशैली तथा सुमधुरा रसप्रतधाना गुणवती यथा-

**सूक्तीनां विमर्शः-** बाणो रससिद्धो कवीश्वरः। श्रृङ्गारसोऽस्य प्रेष्ठो रसः। स सम्भोगविप्रलम्भपसद्बय वर्णने समरूपेण दक्षः। सम्भोगश्रृङ्गारवर्णनापेक्षया विप्रलम्भ वर्णने तस्य लेखनी प्रवाहमधुरा प्रचारचतुरा च। महाश्वेता कादम्बरीच स्वप्रियतमं प्रेक्ष्य कथमिव व्याकुलतां भजतः कथं प्रेमाङ्कुरोदयः, कथं विकासः पल्लवितत्वं पुष्पितत्वं चेति एतस्य मनोवैज्ञानिकं विश्लेषणं तस्य कवितमत्वं पञ्चबाणत्वं च साधयति। यथा-

"अनन्तरं च मेऽन्तर्मदनावकाशमिव
दातुमाहितसन्ताना निरीयुः श्वासमारूतः।
साभिलाषं हृदयमाख्यातुमिव स्फुरितमुखमभूत् कुचयुगलम्।
स्वेदसलिलनलेखाक्षालितेवागल्लज्जा।"(कादम्बरी)।

महाश्वेतावर्णने तस्यां यौवनप्रवेशस्य एकावलीमूलकं वर्णनं कथमिव मनोज्ञताम् उदवहत- "क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, यौवनेनपदम्" (कादम्बरी)।
हर्षचरिते मातुर्यशोवत्या हर्षं प्रत्युक्तिः भावभाषा प्रसादादिगुणैः सर्वथा हृदयं द्रावयति-
"वत्स, नासि न प्रियो निर्गुणो वा परित्यागार्हो वा। स्तन्येनैव सह त्वया पीतं मे हृतयम। कुलकलत्रमस्मि चारित्रधना धर्मधवले कुले जाता। बीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रीता कथमन्यथा कुर्यात्।" (कादम्बरी)।
चन्द्र एव चन्द्रापीडः शूद्रकश्च, पुण्डरीक एव वैशम्पायनः शुकश्च, लक्ष्मीरेव चाण्डालकन्येति को विश्वसितुं पास्यति।

"कादम्बरी रसज्ञानामाहारोऽपि न रोचते।"

सर्वत्रैव वर्णने प्राग् विषयस्य साङ्गोपाङ्गनिरुपणम् ततश्च समासबहुलं वर्णनम्, ततश्च श्लेषमूला उत्प्रेक्षा उपमाश्च ततश्च विरोधाभासेन परिसंख्यालंकारेण वा समापनम्। श्लेषमूलासु उपमासु, विरोधाभासे परिसंख्यायां च पाण्डित्यप्रदर्शनेन प्रयुक्तं वाक्यं 67 पंक्तिविस्तृतम्। कादम्बरीदर्शने प्रयुक्तं वाक्यं तु विस्तृतं सत् 72 पङ्क्तिविशालतामभजत्। विशेषणानां विशेषणानि, तदनु तेषामपि विशेषणानि गहनत्वम् आपादयन्ति, यत्र क्रियापदम विलुप्तमिव विशेषणानि गहनत्वम् आपादयन्ति, यत्र क्रियापदं विलुप्तमिव प्रतिभाति। कथाप्रवाहश्च निरूद्ध इव प्रतीयते। वर्णनान्येतानि गहनत्वम् आपादयन्ति, यत्र क्रियापदं विलुप्तमिव प्रतिभाति।

कथाप्रवाहश्च निरूद्ध इव प्रतीयते। वर्णनान्येतानि सहृदयहृदया वर्जकानि, परं कथाप्रवाहनिरोधः कथात्वं व्याहन्ति।

एवं दण्डिनो दशकुमारचरितम्, सुबन्धोर्वासवदत्ता, बाणस्य हर्षचरितं कादम्बरी चेति गद्यकाव्यस्य रत्नानि समुपलभ्यन्ते। दण्डि-सुबन्धु-बाणभट्टा गद्यकवीनां बृहत्त्रयीरूपेणाभिनन्धन्ते। संस्कृतगद्यकाव्यस्य परिष्कृतं प्राञ्जलं विशदं च रूपं दण्डिनो दशकुमारचरिताद् दृष्टिपथम् उपयाति।

सुबन्धुकृत वासवदत्तायाम् अलंकृता श्लेषबहुला शैली दृग्गोचरतामायाति 'ओजः समासभूयत्वमेतद् गद्यस्य जीवितम्' इति सर्वात्यरूपेण सुबन्धौ उपलभ्यते। कविः स्वकाव्यप्रशंसायामुल्लिखति- 'प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिनिबन्धनम्' (वासव.भ.13)।

कादम्बर्यां बाणः स्वपाण्डित्यप्रकर्षं सहृदयाह्लाद जननरूपेन विनियुङ्क्ते। सितामधुरं व्यञ्जकनमिव सर्वथा सर्वतः मधुरात्मिकैव कादम्बरी। तरूम्बरी। तरुणीव विदग्धमनोमोहिनी गद्यकाव्यसर्वस्वभूता च।

## सन्दर्भ सूची


1. भारतीय काव्यशास्त्र, डां हरिश्चन्द्र,वर्मा हरियाणा ग्रन्थ अकादमी, पंचकूला 2013.
2. साहित्यदर्पणः(आ.विश्वनाथ) .डा. सत्यव्रतसिहः चौखम्बा विद्याभवन,वारणसी-2015
3. काव्यप्रकाश,(आ.मम्मट), सिद्धान्तशिरोमणि आचार्य विश्वेश्वर, आज.भवन, सन्त कबीर मार्ग, वारणसी.2015
4. ध्वन्यालोक : आनन्दवर्धन (लोचन टीका सहित), पाठक आचार्य जगन्नाथ, चौखम्बा, विद्याभवन, वाराणसी २००९
5. संस्कृत काव्यशास्त्र और काव्यपरम्परा, त्रिपाठी राधावल्लभ,प्रतिभा प्रकाशन दिल्ली २००४
6. साहित्यदर्पण : कविराज विश्वनाथ, डॉ. निरूपण
7. विद्यालंकार, साहित्य भण्डार, सुभाष बाजार, मेरठ-२
8. संस्कृत साहित्य का इतिहास : उपाध्याय डॉ. बलदेव,चौखम्बा, विद्याभवन, वाराणसी १९८७
9. संस्कृत साहित्य का अभिनव इतिहास : त्रिपाठी डॉ. राधावल्लभ, विश्वविद्यालय प्रकाशन, वाराणसी २००१
10. संस्कृत साहित्य का इतिहास : डॉ. वचन देव कुमार, नेशनल पब्लिकेशन हाउस, नई दिल्ली १९९०.